# । सिद्धान्तस्थापनायां चरकाभिमता संभाषाविधिः ।

**Dr. K. N. Harikrishna Sarma**

शोधकार्यस्य लक्षणं सैद्धान्तिकघटनाश्चाधिकृत्य बह्व्यः व्याख्याः सुलभतया वर्तन्ते। विशिष्टे कस्मिंश्चिद्विषये अनधिगतस्य सप्रयोजनस्य च कस्यचिदाशयस्य सम्पादनाय अनुसरणीया युक्तियुक्ता साङ्केतिका च काचनान्वीक्षणपद्धतिः शोधपदवाच्या इति सामान्येन कैश्चिन्निगद्यते। वास्तविकेन साङ्केतिकेन च विशकलनेन शास्त्रीयाणां सामाजिकानां च समस्यानां परिहाराय शोधकार्याण्यायोजयन्ति। अर्थात् प्रावृतानां सत्यानामनावरणाय प्रवर्तमानं किमपि विज्ञानविमार्गणमेव शोधकार्यम्। तेन मार्गणेन ग्रन्थाचार्य-स्वानुभवपरप्रेक्षणप्रभृतिभ्यः साक्षात्परोक्षाद्वा समाकलितानां ज्ञानविशेषशकलानां प्रमथनेन दधेर्नवनीतमिवोदीर्यमाणः सिद्धान्त एव शोधकार्यस्य जीवातुभूतः गतिविधायकश्च सन् विराजते। स्वाध्ययनपरिशीलनसमवधानविशकलनसन्तुलनतर्कमीमांसादिभिरनुशीलयतः शोधकार्यस्य स्थूणानिखननमेव सिद्धान्तस्थापनम्। संस्थापितस्य सिद्धान्तस्यानुसरणेनैव शोधकार्यं किं वा वर्णनात्मकं उत विशकलनात्मकं, प्रयुक्तमुत मौलिकं, पारिमाणिकमुत गुणात्मकं, साङ्कल्पिकमुतानुभवसिद्धमनुनेयमिति निश्चीयते।

शोधकार्यरीतिशास्त्रमधिकृत्य पौरस्त्यपाश्चात्ययोरध्ययनं बहु विस्तृतं वर्तते। तेषु पौरस्त्यानां न्यायचिन्तापद्धतिरेव सुविस्तरेण विषयमिममधीत्य वर्णिता। संस्कृतसाहित्यशाखायां इतराभिश्शास्त्रसरणीभिरपि साकं शोधकार्यस्य सोपानानि प्रतिपादितानि। तासु चिकित्सासाहित्यस्य प्राधान्यं प्रथमगणनीयमेव। चिकित्सासाशास्त्रः स्वतः एव शोधस्वभावः। तस्मिन् चरकाचार्यस्य सिद्धान्ताः आशयाश्च पण्डितमण्डलैर्महिम्नि प्रतिष्ठापिताः। चरकसंहितायां विमानस्थाननामकोऽध्यायः सिद्धान्तसर्जने, परीक्षणे, तत्साधुत्वे सिद्धे संस्थापने

च के के मार्गाः समालंबनीयाः इति युक्तियुक्तं प्रतिपादयति। तेषु आशयेषु शोधकार्यानुबद्धसिद्धान्तस्थापनपराः आदेशाश्चानुमातुं शक्यन्ते।

चरकाचार्यस्य मतानुसारेण शास्त्राभिधानं उपायत्रयेण सिद्धम् स्यात्। ते तूपायाः इह शोधसंबन्धितया विचार्यन्ते।

**अध्ययनाध्यापने।**

चरकाचार्यः अध्ययनविधिं एवमुपपादयति - 'एकाग्रमनःप्रणीताभिः वाग्भिः सूत्रमनुक्रामन् पुनःपुनरावर्तयेत्, बुद्ध्वा सम्यगनुप्रविश्यार्थतत्त्वं स्वदोषपरिहारार्थं परदोषप्रमाणार्थं च। एवं मध्यन्दिने अपराह्ने रात्रौ च शब्द परिहापयन् अध्ययनमभ्यस्येत्' (चरकसंहिता ८.६) इति। शोधकार्यहेतुभूता समस्या अध्ययनेनैव संपादनीया। इह केवलं अनधिगतविषयपरं शास्त्राध्ययनं न परामृश्यते, किन्तु सम्यगधीतस्य विषयस्योपरि प्रचाल्यमानं तर्कधीविलसितं हानोपादानयुक्तिप्रयुक्तं साङ्गत्यासाङ्गत्यविचारपरं प्रयोजनत्वपरीक्षणोपेतं च परिचिन्तनमेव वर्ण्यते। ईदृशेनैवाध्ययनेन शोधयोग्यं विषयमुपलभ्यते। नेदमध्ययनं केवलं शोधविषयावाप्तय एव प्रवर्तते, किन्तु पूर्ववर्तिन्याः कस्याश्चित्समस्यायाः समाधानदिदृक्षयापि स्यात्। अत एव अध्ययनं नाम अनेनैव प्रकारेण स्यादित्याचार्येण निर्दिश्यते, येन शोधप्रवाह एव सृज्यते।

अनेनाध्ययनेन प्रवृत्तं शोधकार्यमुन्निनीषुः शोधकर्ता निश्चयेन कश्चिदधिकारी एव स्यात्। शोधाधिकारिणः लक्षणं आचार्येण अध्यापननिरूपणे प्रपञ्चितम्, यच्छोधनिर्देशकेण परीक्षितं स्यात्। शोधकर्ता क इति निर्णीयमानानि तानि तु लक्षणान्येवं - प्रशान्तः, आर्यप्रकृतिः, अक्षुद्रकर्मा, ऋजुचक्षुर्मुखनासावंशः, तनुरक्तविशदजिह्वः, अविकृतदन्तौष्ठः, अमिन्मिनः, धृतिमान्, अनहङ्कृतः, मेधावी, वितर्कस्मृतिसम्पन्नः, उदारसत्त्वः, तद्विद्यकुलजः, तद्विद्यवृत्तः, तत्त्वाभिनिवेशी, अव्यङ्गः, अव्यापन्नेन्द्रियः, निभृतः, अनुद्धतः, अर्थतत्त्वभावकः, अकोपनः, अव्यसनी..( चरकसंहिता ८.७) चेति। प्रतिलक्षणं वर्तमानं शोधवैशिष्ट्यं जिज्ञासुभिः विचिन्त्य बोध्यम्।

**संभाषापद्धतिः**

प्राचीनभारतीयदार्शनिकग्रन्थेषु इतरशास्त्रग्रन्थेषु च सिद्धान्तचर्चायै प्रयुज्यमाना संभाषाशैली । सामान्येन पूर्वपक्षसिद्धान्तयोस्संवादरूपेणैवास्यां

तत्त्वप्रतिपादनम्। परन्तु चरकाचार्यमतानुसारेण तत्त्वावबोधनसाधनभूता संभाषा वादादीनां धातुस्वरूपा। सूक्ष्मतमायाः संभाषायाः एव कस्यचन सिद्धान्तस्य सृष्टिः। अध्ययनकाल एव तस्याः समुदयः, तथा संभाषासाधकं अध्ययनमेवाध्य यनपदव्यवहारयोग्यमित्यभिज्ञमतम्। अत एवाध्ययनशैली निश्चयेन तत्साधिका स्यात्। अध्येतृहृन्मुकुरान्तस्सञ्जायमाना संभाषा एव वादाद्युपादानभूतं कमपि सिद्धान्तं रूपीकरोति। अध्येतरि स्वान्त एवैदम्प्राथम्येनेयं संभाषा नोपजायते च ेदपरैस्संभाषामाचरितुंकथं शक्यते? इह चरकः अधीतं कमपि वैद्यं प्रकृतीकृत्य संभाषापद्धतिमिमां विशदीकरोतीत्यतः शोधकर्तर्यपीयं नितरामुपपद्यते, वैद्यवृत्तेरपि शोधप्रकृतित्वात्। वैद्यसंभाषापद्धत्यामितरैरनुसन्धीयमानाः संभाषाविशेषाः शोधकर्तरि स्वेनैवानुशील्यन्ते। प्रतिपदं स्वपक्षस्य निरन्तराक्षेपकं परपक्षमसंभावयन् न कश्चन शोधकार्येऽनवद्यतामवाप्नोति। ईदृश्या संभाषया किं वा प्रयोजनमिति चरकेणैव सूच्यते-'तद्विद्यसंभाषा हि ज्ञानाभियोगसंहर्षकरी भवति, वैशारद्यमपि चाभिनिर्वर्तयति, वचनशक्तिमपि चाधत्ते, यशश्चाभिदीपयति, पूर्वश्रुते च संदेहवतः भूयः अध्यवसायमभिनिर्वर्तयति, अश्रुतमपि च कञ्चिदर्थं श्र ोत्रविषयकमापादयति...' (चरकसंहिता ८.१५) इति।

### सन्धायसंभाषा

संभाषेयं द्विविधा सन्धायसंभाषा विगृह्यसंभाषा चेति। 'तत्र ज्ञानविज्ञ ानवचनप्रतिवचनशक्तिसंपन्नेनाकोपनेनानुपस्कृतविद्येनानसूयकेनानुनयकोविदेन ा क्लेशक्षमेण प्रियसंभाषणेन च सह सन्धायसंभाषा विधीयते' (चरकसंहिता ८.१७)। शोधकर्तारमधिकृत्यातिप्रधानस्य सर्गसौन्दर्यशालिनश्च शोधकर्मणः प्रभवः यस्याः चिन्तासरण्याः भवति, सा सन्धायसंभाषेति कीर्त्यते। यं प्रति कुर्यादिति चरकेण सन्धायसंभाषोपदिश्यते, स इह शोधकर्मणि शोधकर्तुः प्रतिरूप एव भवति। अध्ययनेन स्वेन रूपीकृतस्य सिद्धान्तस्य प्रबलः प्रसक्तः सुव्यवस्थितः दुरभिभाव्यश्च पूर्वपक्ष एव सन्धायसंभाषया शोधकर्तुरन्तरङ्गे समुपजायते। आविष्कृते सिद्धान्ते अध्ययनन्यूनताभिरन्तरिन्द्रियचापल्यैर्दुरुपदिष्टतया वाऽपन्नं दौर्बल्यमवबोधयदात्मनः सिद्धसाधुतावज्ज्ञानमेवायं पूर्वपक्षः। उदितेऽस्मिन्पूर्वपक्षे तत्समाधानाय शोधकर्त्रा चपलोपायः अनाश्रयणीयः औदासीन्यतया पूर्वपक्ष एव न परित्याज्यश्च, येन सिद्धान्त एव बाध्येत। अतः सन्धायसंभाषेति

शोधोपायः पूर्वपक्षोदये कथं प्रयोक्तव्य इति 'तथाविधेन सह कथयन् विस्रब्धः कथयेत्, पृच्छेदपि च विस्रब्धः, पृच्छते चास्मै विस्रब्धाय विशदमर्थं ब्रूयात्, न च निग्रहभयादुद्विजेत, निगृह्य चैनं न हृष्येत्, न च परेषु विकत्थेत, न च मोहादेकान्तग्राही स्यात्, न चाविदितमर्थमनुवर्णयेत्, सम्यक् चानुनयेनानुनयेत्, तत्र चावहितः स्यात्। इत्यनुलोमसंभाषाविधिः' (चरकसंहिता ८.१७) इति वाक्यादनुमातुं शक्यते। यद्यच्चरकेणाकर्तव्यतयोपदिश्यते तत्तच्छोधकर्त्राऽत्मवऽचनापरतया क्वचिदनुशील्यमानाः तत्त्वविघातिनः दुरुपायाः स्युः। न प्रमा कदाचिदपि भ्रमसाध्या। अतः यदि स्वसिद्धान्तस्य साधुत्वे सुदृढे निश्चितेऽपि हेत्वाभासादिष्विव तद्विघातकतयोन्नीतस्य पूर्वपक्षस्यापि साङ्गत्यसिद्धौ अनुनयेन त्याज्यग्राह्यबुद्ध्या च पूर्वपक्षसिद्धान्तयोर्विरुद्धांशहानेनानुकूलांशोपादानेन च तत्त्वाव्यभिचारितया सिद्धान्तं परिष्कुर्यात् अथवा विपुलीकुर्यादित्यर्थः।

**विगृह्यसंभाषा**

सन्धायसंभाषया सिद्धान्ते विमलेऽनवद्ये च कृते, शोधकर्ता विगृह्यसंभाषया शोधप्रक्रियायाः सुप्रधानं कमप्यंशं प्रविशति। यदि सन्धायसंभाषया सिद्धान्तस्य तात्त्विकतलं दृढीक्रियते तर्हि विगृह्यसंभाषया तस्यैव प्रयुक्ततलं प्रतिष्ठाप्यते। प्रयुक्ततले संपद्यमाना साधुता चारुता वा शोधकार्ये साफल्यमाकलयति। प्रयुक्तस्तरेऽसाधुत्वं भजन्तो सिद्धान्ताः पक्षाभ्यां विहीनः खग इवाचिरादेव बाध्यमानाः स्युः। दिष्ट्या तात्त्विकस्तरे साधवस्सिद्धान्ताः न कथञ्चिदपि प्रयुक्तस्तरेऽसाधुत्वं भजन्ते। यदि ते सिद्धान्ताः प्रयुक्तस्तरेऽसाधवो जायन्ते, शोधकर्तुर्दौर्बल्यमेव तद्धेतुरिति निर्णयेत्, न तु सिद्धान्तस्य। स शोधकर्ता औदासीन्येन तात्त्विकसाधुतयैव स्वयं तृप्तिं वाञ्छति। शीलमिदमनभिलषणीयमिति सुदृढमवगमयितुं विगृह्यसंभाषा चरकेण वर्ण्यते - 'अत ऊर्ध्वमितरेण सह विगृह्य संभाषायां जल्पेच्छ्रेयसा योगमात्मनः पश्यन् प्रागेव च जल्पाज्जल्पान्तरं परावरान्तरं परिषद्विशेषांश्च सम्यक्परीक्षेत। सम्यक्परीक्षा हि बुद्धिमतां कार्यप्रवृत्तिनिवृत्तिकालौ शंसति, तस्मात् परीक्षामभिप्रशंसन्ति कुशलाः..... (चरकसंहिता ८.१८)' इति। इह सिद्धान्तस्य प्रयुक्ततलानयने प्रयोगयोग्यानां परिषदां स्थानानां वा परीक्षा करणीया। तेषां श्रुतं विज्ञानं, धारणं, प्रतिभानं, वचनशक्तिः इत्यादीन् श्रेयस्करान् गुणान् कोपनत्वावैराग्यभीरुत्वाधारणत्वान-

वहितत्त्वादीन्दोषांश्च परीक्षेत। सिद्धान्तस्य प्रयोक्तव्यता एभिरेव दोषैर्विरुद्ध्यते, तस्या एवौदासीन्यं सद्गुणानामनवधानतया प्रसज्यते च।

परिषत्तु ज्ञानवती, मूढा चेति सामान्येन द्विविधा सती त्रिविधा पुनर्विभज्यते सुहृदुदासीनप्रतिनिविष्टभेदेन। तद्विभागविशेषैः प्रयोगविशेषैः वादमर्यादालक्षणैश्च चरकेण सूचितस्य सिद्धान्तस्य शोधरूपान्तराणि विस्तरभिया न वर्ण्यन्ते।

एवं एकचत्वारिंशद्वादमार्गपरीक्षाभिस्संशोधितस्सन् साधुत्वसंपन्नः सिद्धान्तः चरकेण चतुर्धा विभज्यते - 'सिद्धान्तो नाम स यः परीक्षकैः बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः। स चतुर्विधः सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः, अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्तश्चेति ... (चरकसंहिता ८.३७)'। इतः परमपि चरकेण वर्णिताः परीक्षाविशेषाः यद्यपि चिकित्सासम्प्रदायगताः तथापि शोधच्छात्रमधिकृत्य शोधकार्यस्य समग्रतायै अनवद्यतायै च नितरां साह्यमाचरन्त एव वर्तन्ते।

## शोधसाङ्गत्यम्

एवं सम्भाषापद्धतेर्विशकलनेन चरकाचार्यः प्राचीनभारतीयशोधकार्य पद्धतिमेव प्रतिपिपादयिषतीत्यवगच्छामः। यथाऽर्वाचीनैरधीयते तथैव चरकोऽपि शोधप्रक्रियायाः सोपानद्वयं संसूचितवान्। तयोः प्रथमः शोधसमस्यायाः साक्षात्कारः, अपरः सिद्धान्तस्य रूपीकरणञ्च; द्वावपि संभाषापद्धत्या प्रतिपादितौ। सन्धायसंभाषायाः वर्णनावसरे अनुभूतिः, साहित्यम्, नियतसिद्धान्तः इत्येतानि शोधसमस्यायाः साक्षात्कारस्य स्रोतांस्यपि निरूपितानि। तदनुसृत्य शोधविषयस्य स्वीकारः, तस्यैव सङ्कोचः, तन्निदानस्य शोधसमस्यायाः मूल्याङ्कनञ्च यथाविधि प्रचाल्यन्ते। शोधसमस्यायाः प्रामुख्यं शोधयोग्यतां साङ्गत्यञ्चाधिकृत्य मूल्याङ्कनं कृत्वैव सिद्धान्तस्य रूपीकारः भविष्यति। सिद्धान्तस्तु काभिरपि योग्यताभिः संपन्नः स्यादिति चरकस्य अभिप्रायः तस्य संभाषाविस्तारेषु लीनं भवति। सः परीक्षायोग्यः तर्कयुक्तिसम्मतश्च स्यात्। शोधसिद्धान्तस्य शोधसमस्यायाश्च मिथः निरुपाधिकः सम्बन्धः एव स्यात्। शोधसिद्धान्तः प्रमाणमाश्रित्य प्रवृत्तः स्यात्। सः शोधाध्ययनस्य मर्यादाविधायकः भवेत्। त्याज्येन ग्राह्येन वा रूपेण प्रवृत्तः सिद्धान्तः अध्ययनस्य चटुलतामाकलयति इति च।

सन्धायसंभाषया विगृह्यसंभाषया च रूपीक्रियमाणः सिद्धान्तः अनुलोमेन प्रतिलोमेन च प्रसिद्धेन प्रकारद्वयेनैव सृज्यते। तत्र सन्धायसंभाषायां अनुमानप्रक्रियायामिव अवधानतया निरीक्षणेन समस्यायाः सिद्धान्तस्य वा मातृकारूपं निर्मीय परीक्षणार्थं कमपि सङ्कल्पविशेषं रूपीकरोति। तत्समाधाय अन्तिमः सिद्धान्तः रूपीक्रियते। विगृह्यसंभाषायान्तु श्रुतिप्रमाण इव प्रथमतो रूपीकृतस्सिद्धान्तः पुनस्सङ्कल्पेनाश्लिष्य सामान्यांशेषु अवधानतया निरीक्ष्य निश्चित्य च दृढीकरोति।

एवं निरवद्यस्य महतश्च सिद्धान्तस्य रूपीकरणे प्रवृत्ता संभाषाप्रक्रिया शोधप्रक्रियायाः सर्वतलस्पर्शिनी काचन रीतिरेवेति सिद्धम्। शोधमण्डले इतोऽपि सौकर्यं सामर्थ्यं चाकलयितुं चरकाचार्यस्य अध्ययनानि साह्यमाचरन्ति। तथा च भारतीयशास्त्रसाहित्यवैज्ञानिकसम्पदां हेतुभूता ईदृशी शोधस्वभावा अध्ययनप्रक्रिया लोकेषु मङ्गलाय प्रस्तारयितव्या चेत्यस्मिन् विषये न सन्देहलेशोऽपि विद्यते।

**References :-**

1. चरकसंहिता। चैखम्बा संस्कृत ग्रन्थावली। वाराणसी। २००७
2. The Charaka Samhita , Kaviratna, A.C. and P. Sharma, tr., 5 Vols., Indian Medical Science Series, Sri Satguru Publications, a division of Indian Books Centre, Delhi 81-7030-471-7
3. गवेषणरीतिशास्त्रम्। डा. नटुवट्टं गोपालकृष्णन्। केरल भाषा इन्स्टिट्यूट्। २००२
4. Elements of Research Methodology in Sanskrit. Keśavacandra Dāśa Chaukhambha Sanskrit Sansthan, 1992
5. Methodology in Indological Research – Shrimannarayana Murthi, Bharatiya Vidya Prakashan, Delhi.
6. सर्वदर्शनसङ्ग्रहः। माधवाचार्यः। चैखम्बा संस्कृत ग्रन्थावली। वाराणसी। १९९७
7. http://www.newagepublishers.com/samplechapter/000896.pdf
8. http://www.ihmctan.edu/PDF/notes/Research_Methodology.pdf